# Ramadevikritam Vishnu Stotram

# રમાદેવીકૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Ramadevikritam Vishnu Stotram

File name : ramAdevIkRRitaMviShNustotram.itx

Category : vishhnu, vishnu, tAmraparNImAhAtmya, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : tAmraparNImAhAtmya | adhyAya 61/159-169||

Latest update : December 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 13, 2025

*sanskritdocuments.org*

# રમાદેવીકૃતં વિષ્ણુસ્તોત્રમ્

આદ્યં નમઃ કારુણિકં પવિત્રં
નતાર્તિશમનાધારબદ્ધદીક્ષમ્ ॥ ૧૫૯॥

સાક્ષિં પુનઃસકલજીવનપરિશ્રમાણાં
વિશ્રાન્તિમણ્ડપપદામ્બુરુહં નતાનામ્ ।
આદ્યોઽયમસ્ય જનકઃ સ્વપિતા પિતા ચ
નેતા ગતિં નિજપદામ્બુરુહાનનાનામ્ ॥ ૧૬૦॥

નાથઃ સમસ્તભુવનસ્ય મમાપિ જીવ-
લેખામયો ભવતુ નઃ પુરતઃ પુરાણઃ ।
વાણી પુરાણપદવી નિખિલશ્રુતીનાં
સાર્થં પરિશ્રમમુપેત્ય મનો વિકારૈઃ ॥ ૧૬૧॥

જાનાતિ વા ન હિ વિમૃશ્ય નિવર્તિતા વા
તં કેવલં પરમકારુણિકં નતાસ્મિ ।
યં પ્રાહુરાદ્યમનપાયમશેષવેધા
મોહાન્ધકારપટલાથ પરં પ્રકાશમ્ ॥ ૧૬૨॥

બ્રહ્માદયોઽપિ તમિમં હૃદયં પ્રપદ્યે
પ્રાપ્તં પ્રકામમભિલાષમહોદયાનામ્ ।
યજ્ઞૈર્જપૈરપિ મનુપ્રવરસ્ય દાનૈઃ
પૂજાવિશેષપુષિતાભ્યુદયપ્રણામૈઃ ॥ ૧૬૩॥

પ્રાણેન્દ્રિયોપશમનૈઃ પ્રવિશન્તિ સિદ્ધાઃ
યન્તં પુમાંસમુરુકાયમુપૈમિ નિત્યમ્ ।
યત્પાદપદ્મમકરન્દજુષાં મુનીનાં
બ્રહ્મેન્દ્રરુદ્રપદવીવિભવો હિ હેયઃ ॥ ૧૬૪॥

નાથો મમાસ્તુ નલિનાયતલોચનોઽયં

અગ્રે જગત્ત્રયસુરક્ષણજાગરૂકઃ ।
એકોઽપ્યનેકવિધમૂર્તિવિકલ્પનાભિઃ
કર્તા યમાવિતિ પિપીલિકજીવિકાનામ્ ॥ ૧૬૫॥

ભક્ત્યા પુનઃ પ્રલયતઃ પ્રણયૈકધામા
કામાય મે ભવતુ કારણકારણાત્મા ।
આદ્યોઽયમસ્ય જગતઃ પ્રભુરપ્રકાશઃ
પાપાત્મનામસુકૃતિનાં વિહતપ્રકાશઃ ॥ ૧૬૬॥

ઈશે પદે ભવતુ મે ભગવાન્ પુરાણઃ
ભક્તાવલમ્બિતપદામ્બુરુહઃ શ્રુતીનામ્ ।
શ્રાન્તોઽસ્મિ નાથ નિખિલશ્રમશાન્તિહેતોઃ
સ્વાન્તાત્પ્રમૃજ્ય પરિતાપતતિં મદીયામ્ ॥ ૧૬૭॥

આયાહિ પાહિ પુરતો ન સહે વિયોગ-
મુર્વીવ ઘર્મતપનાંશુમસહ્યમાનામ્ ।
નારાયણં નરસખં નલિનાયતાક્ષં
સાક્ષાત્કરોમિ હૃદયે સદયં દયાલુમ્ ॥ ૧૬૮॥

ત્વામાદિનાથમખિલશ્રુતિસારમેકં
મા તે વિલમ્બનદશા પરિવર્તનીયા ।
મા હર્તુમર્હસિ ભવચ્છરણાબ્જભૃઙ્ગી-
મઙ્ગીકુરુષ્વ સહસા કરુણામૃતાબ્ધે ॥ ૧૬૯॥

કાઙ્ક્ષે મુહુઃ કમલલોચનપાદમૂલે
કર્તું શિરસ્સકરુણં પરિપશ્ય દીનામ્ ।

ઇતિ તામ્રપર્ણીમાહાત્મ્યે ૬૧-અધ્યાયાન્તર્ગતં
રમાદેવીકૃતં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

તામ્રપર્ણીમાહાત્મ્ય । અધ્યાય ૬૧/૧૫૯-૧૬૯॥

tAmraparNImAhAtmya . adhyAya 61/159-169..

Proofread by PSA Easwaran

*Ramadevikritam Vishnu Stotram*

pdf was typeset on December 13, 2025

Please send corrections to *sanskrit@cheerful.com*